SEPT I

# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 01-09-2013 अङ्काः–100

पूर्वाह्ण - 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**1 पञ्चानां एकवाक्येन उत्तरं लिखत ।** 5

1. कस्य औषधं नास्ति ?
2. कः कं उपहन्ति ?
3. पवनपदवीमारूढं काः प्रेक्षिष्यन्ते ?
4. के कान् उपभुज्य अमर्त्याः जाताः ?
5. अर्थदर्शनं कः कुरुते ?
6. कस्य किं सौभाग्यविलोपि न जातम् ?
7. कः नारीणां परमो धर्मः ?
8. दशकुमारचरितम् केन रचितम् ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

1. महात्मनां किं प्रकृतिसिद्धम् ?
2. मधुमक्षिकाणां व्यवहारं वर्णयत ।
3. पौरान् प्रति सक्रोधं बकः किं किं चिन्तयति ?
4. विप्रयोगे कः रुणद्धि ?
5. भीमः केषां मध्यमः ?
6. कीदृशः रिपुः उन्मूलयितुं सुकरः ?
7. धर्मराजस्य दृष्ट्या बान्धवाःके ?
8. राजवाहनः विन्ध्याटवीमध्ये कीदृशं पुरुषं ददर्श ?

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

1. ''दैवं पृष्ठतः कृत्वा पौरुषमाश्रयन्ते पुरुषर्षभाः'' इति वाक्यम् अर्जुनेन कथं समर्थितम् ?



पश्चादनुवर्तते

2. पाण्डवाः कीदृशाः इति ब्राह्मणः वदति ?
3. सौख्यत्रयेणापि कुन्ती कथं वञ्चिता आसीत् ?
4. अब्धेः स्वभावः कीदृशः ? विवृणुत ।

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

1. अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षणजः अनलः ।
2. आत्मनः व्रतत्यागेनापि आत्मीयस्य व्रतसत्यापनम् ।
3. कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।
4. एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।
5. अविवेकः परमापदां पदम् ।

**5 द्वयोः भावं विशदयत ।** 8

1. भग्नं भित्तिभिरालयैर्निपतितं स्त्रोतोभिराप्लावितं
   विध्वस्तं पशुभिश्च संघश इति क्रोशन्ति वृष्टे त्वया ।
   त्वय्युद्गृह्णाति वारि वारिद जना नश्यन्त्यवश्यं क्षणा –
   त्कीर्तिं चिन्तय दुर्लभां न गणय क्षुद्रान् गुणान् मादृशाम् ।।

2. अभिमानवतो मानस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
   विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ।।

3. लब्ध्वा सुदुर्लभतरं नरजन्म जन्तुः
   तत्रापि पौरुषमतः सदसद्विवेकम् ।
   संप्राप्य चैहिकसुखाभिरतो यदि स्यात्
   धिक् तस्य जन्म कुमतेः पुरुषाधमस्य ।।

**6 श्लोकद्वयं पूर्णं लिखत ।** 4

1) प्रधानं ........................................ व्रतमिदम् ।।

2) मातेव ............................................. विद्या ।।

**7 एकस्य कवेः देश-काल-ग्रन्थान् अधिकृत्य लिखत ।** 4

1) विद्वान् एन्. रङ्गनाथशर्मा 2) दण्डी 3) कालिदासः

8 एकस्य लघुटिप्पणीं लिखत । 4

1) मातङ्गः 2) भीष्मः

9 चत्वारि पदानि वाक्ये योजयत । 4

1) संप्रति 2) रोचते 3) निःशङ्कम्
4) अभिहितः 5) क्षीयते 6) ददर्श

10 चतुर्णां पर्यायपदानि लिखत । 4

1) सरित्पतिः 2) सुधाकरः 3) द्विषः
4) तिमिरः 5) विद्युत् 6) रथः

11 चतुर्णां रूपाणि विवेचयत । 4

1) यतिष्ये 2) अटन्ती 3) गिरम्
4) हृहयग्राहिणि 5) वर्त्मनि 6) प्रयान्तः

12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत । 4

1) गदापाणिः 2) गिरिवनजलपुष्पैः 3) समरशौण्डीरः
4) तालध्वजः 5) कुबुद्धिः 6) सुधामुचः

13 चतुर्णां सन्धिं विभज्य नाम लिखत । 4

1) अणुरपि 2) तस्माद्गच्छ 3) ह्येषः
4) सहसागत्य 5) भगवन्नभिवादये 6) वाङ्मयः

14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

1) तृण्ढि 2) अगमत् 3) धर्षयेत्
4) प्रपत्स्ये 5) ददर्श 6) निगृह्णीमहे

15 द्वयोः व्याकरणविशेषं लिखत । 4

1) नगाधिराजः 2) अवलम्ब्य अलम् 3) चरिष्णुः



पश्चादनुवर्तते

**16** **समासमेकं सलक्षणं विशदयत ।** 4

1) बहुव्रीहिः 2) द्वन्द्वः

**17** **प्रयोगपरिवर्तनं कुरुत ।** 3

1) अस्माभिः स्थास्यते ।

2) अहम् अलज्जे ।

3) त्वया वयं पुनर्द्रष्टव्याः।

**18** **इतर वचनरूपाणि लिखत ।** 3

1) मघोनः — — ।

2) — ताभ्याम् — ।

3) — — अस्माकम् ।

**19** **रिक्तस्थानं पूरयत ।** 4

1) ननु पापाः ...................... ।

2) स्थितः पृथिव्या ......................... ।

3) विपदन्ता ............................ ।

4) यत्ने कृते ........................... ।

**20** **चतुर्थं पदं लिखत ।** 4

1) दशकुमारचरितम् – दण्डी ; मध्यमव्यायोगः – .......... ।

2) पुण्डरीकाक्षः – बहुव्रीहिः ; मातापितरौ – ............।

3) अल्पम् – अनल्पम् ; आदरः – ............।

4) वार्ष्णेयः – कृष्णः ; वैकर्तनः – ............।

* * * *

SEPT (11)

# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – 01-09-2013 अङ्काः–50

अपराह्ने – 1-30 तः 3-00 पर्यन्तम् समयः–सार्धैकहोरा

**1 विषयमेकमं अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत -** 5

1. शङ्कराचार्याः 2. भारतदेशः 3. गणेशोत्सवः

**2 (अ) चतुर्थीविभक्तिः कदा उपयुज्यते। सोदाहरणं विशदयत ।** 5

**(आ) लकाराः के ? ते कस्मिन्नर्थे प्रयुज्यन्ते ?** 5

**3 (अ) उपमालङ्कारं सलक्षणं सोदाहरणं विवृणत ।** 4

**(आ) अत्स्युत्तरस्यां दिशि देवतात्मा - अत्रत्यं वृत्तं सलक्षणं सप्रस्तारं च निरूपयत ।** 4

**4 उत्तरयत। (त्रयाणामेव)** 3

1. 'म' गणः कीदृशः ?
2. काव्ये अर्थः कतिविधः ?
3. भावसूचकचिह्नं उद्धरणचिह्नं च लिखत ।
4. तिङ् प्रत्ययाः कति ?

**5 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

1. चकार 2. वर्धिता 3. अत्यक्ष्यत् 4. भूयात्

**6 प्रयोगपरिवर्तनं कुरुत ।** 3

1. तमो नश्यतु ।
2. सर्वे हसन्ति ।
3. किमर्थं भवद्भिः तूष्णीं स्थीयते ।

**7 वाक्यदोषं परिहरत । (चतुर्णामेव)** 3

1. धिक् तुभ्यम् ।
2. बालकः व्याघ्रेण त्रस्यति ।



पश्चादनुवर्तते

3. भर्त्रुः साकं गता सीता।

4. दर्शनानां वेदान्तः प्रधानम् ।

**8** **टिप्पणीं लिखत । (एकस्य)** 2

1. सतिसप्तमी
2. निर्धारणषष्ठी–सप्तमी

**9** **मातृभाषाया अनुवदत ।** 5

1. कुम्भकर्णेन विकटं जहसे रणमूर्धनि ।
2. नवरात्रोत्सवे वयं शृङ्गेरीं यातास्मः ।
3. कः खलु नाम प्रवचनसमये शब्दमकरिष्यत् ।
4. शान्ते कर्मणि भेतालोदयः ।
5. मोक्षसाधनानां भक्तिः गरीयसी।

**10** **संस्कृतभाषया अनुवदत ।** 5

1. ಗಂಟೆ ಹೊಡೆದ ಮೇಲೆ ಎಲ್ಲರೂ ಹೋಗಿರಿ.
   All should go after the bell rings.
2. ಅವರು ರಜಾದಿನಗಳಲ್ಲಿ ಹಳ್ಳಿಗೆ ಹೋಗುವರು.
   They will go to the village during holidays.
3. ಶುಕಸಾರಣರು ವಾನರ ಸೇನೆಯನ್ನು ನೋಡಿದರು.
   Sukasaranas saw Vanara army.
4. ಕೀಟಗಳಲ್ಲಿ ಜೇನುನೊಣ ಹೆಚ್ಚು ಉಪಕಾರಿ.
   Among the insects bee is most helpfull.
5. ನೀವು ಬಂದಾಗ ನಾನು ಮನೆಯಲ್ಲಿರಲಿಲ್ಲ.
   I was not at home, when you came.

* * * * *